# Shivastuti by Parvati

# પાર્વતીપ્રોક્તં રૌદ્રનામેન શિવસ્તુતિઃ

## Document Information

Text title : Shivastutih by Parvati

File name : shivastutiHpArvatIproktA.itx

Category : shiva, stuti, shivarahasya

Location : doc_shiva

Author : Traditional

Transliterated by : DPD

Proofread by : DPD, Ruma Dewan

Description-comments : || shrIshivarahasyam | bhargAkhye panchamAMshaH | adhyAyaH 40| 153-166 ||

Latest update : July 1, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 1, 2023

*sanskritdocuments.org*

# પાર્વતીપ્રોક્તં રૌદ્રનામેન શિવસ્તુતિઃ

(શિવગૌરીસંવાદે)

શ્રીપાર્વતી -

ચણ્ડાંશુશીતાંશુહુતાશનેત્રં ચક્ષુઃશ્રવાપારવિલોલહારમ્ ।
ચર્મામ્બરં ચન્દ્રકલાવતંસં ચરાચરસ્થં ચતુરાનનેડ્યમ્ ॥ ૧૫૩॥

વિશ્વાધિકં વિશ્વવિધાનદક્ષં વિશ્વેશ્વરં વિશ્રુતનામસારમ્ ।
વિનાયકેડ્યં વિધિવિષ્ણુપૂજ્યં વિભું વિરૂપાક્ષમજં ભજેઽહમ્ ॥ ૧૫૪॥

મધુમથનાક્ષિવરાબ્જપૂજ્યપાદં મનસિજતનુનાશનોત્થદીપ્તમન્યુમ્ ।
મમ માનસપદ્મસદ્મસંસ્થં મતિદાને નિપુણં ભજામિ શમ્ભુમ્ ॥ ૧૫૫॥

હરિં હરન્તમનુયન્તિ દેવા નખૈસ્તથા પક્ષવાતૈઃ સુઘોણૈઃ ।
નૃસિંહમુગ્રં શરભાકૃતિં શિવં મત્તં તદા દાનવરક્તપાનાત્ ॥ ૧૫૬॥

નખરમુખરઘાતૈસ્તીક્ષ્ણયા દંષ્ટ્રયાપિ
    જ્વરપરિકરદેહે નાશ્વતાપૈઃ સુદીપ્તે ।
દિતિજકદનમત્તં સંહરન્તં જગચ્ચ
    હરિમસુરકુલઘ્નં દેવતુષ્ટ્યૈ મહેશઃ ।
પરશુવરનિખાતૈઃ ક્રોડમુત્ક્રોષ્ટુમીષ્ટે ॥ ૧૫૭॥

- -

રૌદ્રનામભિરીશાનં સ્તુત્વાઽથ જગદમ્બિકા ।
પ્રેમાશ્રુપુલકા દેવં સા ગાઢં પરિષસ્વજે ॥ ૧૫૮॥

શૌનકઃ -

કાનિ રૌદ્રાણિ નામાનિ ત્વં નો વદ વિશેષતઃ ।
ન તૃપ્તિરીશચરિતં શ્રૃણ્વતાં નઃ પ્રસીદ ભો ॥ ૧૫૯॥

સૂતઃ -

તાન્યહં વો વદામ્યદ્ય શ્રૃણુષ્વં શૌનકાદયઃ ।

પવિત્રાણિ વિચિત્રાણિ દેવ્યા પ્રોક્તાનિ સત્તમાઃ ॥ ૧૬૦॥

- -

દેવી -

દિશામ્પતિઃ પશુપતિઃ પથીનાં પતિરીશ્વરઃ ।
અન્નાનાં ચ પતિઃ શમ્ભુઃ પુષ્ટાનાં ચ પતિઃ શિવઃ ॥ ૧૬૧॥

જગતાં ચ પતિઃ સોમઃ ક્ષેત્રાણાં ચ પતિર્હરઃ ।
વનાનાં પતિરીશાનો વૃક્ષાણાં ચ પતિર્ભવઃ ॥ ૧૬૨॥

આવ્યાધિનીનાં ચ પતિઃ સ્નાયૂનાં ચ પતિર્ગુરુઃ ।
પત્તીનાં ચ પતિસ્તાભ્રઃ સત્વનાં ચ પતિર્ભવઃ ॥ ૧૬૩॥

આરણ્યાનાં પતિઃ શમ્ભુર્મુષ્ણતાં પતિરુષ્ણગુઃ ।
પ્રકૃતીનાં પતિશ્ચેશઃ કુલુઞ્ચાનાં પતિઃ સમઃ ॥ ૧૬૪॥

રુદ્રો ગૃત્સપતિર્વ્રાત્યો ભગીરથપતિઃ શુભઃ ।
અન્ધસામ્પતિરીશાનઃ સભાયાઃ પતિરીશ્વરઃ ॥ ૧૬૫॥

સેનાપતિશ્ચ શ્વપતિઃ સર્વાધિપતયે નમઃ ।
પ્રણતા વિનતા તવાઙ્ઘ્રિપદ્મે ભગવન્પરિપાહિ માં વિભો ત્વમ્ ।
તવ કારુણ્યકટાક્ષલેશલેશૈર્મુદિતા શઙ્કર ભર્ગ દેવદેવ ॥ ૧૬૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભર્ગાખ્યે પઞ્ચમાંશે શિવગૌરીસંવાદે
પાર્વતીપ્રોક્તં રૌદ્રનામેન શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૪૦। ૧૫૩-૧૬૬॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 40. 153-166..

Notes-

Parvati recites Shiva Stuti composed of
various names of Rudra.

---

*Shivastuti by Parvati*

pdf was typeset on July 1, 2023

Please send corrections to *sanskrit@cheerful.com*